Postal Regd.No. GAMC- 1553/2019-2021 ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १५ अङ्क : १७१
ऑगस्ट - २०२०

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### प्रियशब्दः– UPDATE !

हृदयस्य भावं प्रकटयितुं वयं नैकान् शब्दान् संस्कृतशब्दकोषेषु सम्प्राप्तुं शक्नुमः । शब्दकोषाणाम् अवलोकनमपि मम मनोरञ्जनस्य साधनमेव। विशेषतः यदा ग्लानिः भवति तदा निश्चयेन शब्दकोषः शरणं मम ! तत्र 'अनुक्रोश' शब्दः मह्यं बहु अरोचत । भासस्य स्वप्ननाटके वासवदत्ता 'सानुक्रोशा' अस्ति । सानुक्रोशः मनुष्यः अर्थात् यः परस्मिन् विद्यमानस्य दुःखस्य स्वयम् अनुभवं करोति सः । एतादृशानां मनुष्याणां हृदये परेषां दुःखं प्रतिबिम्बितं भवति । विकसितः समाजः अर्थात् सानुक्रोशानां मनुष्याणां समाजः। कालिदासः रघुवंशे युद्धस्य वर्णनं कृतवान् । विवेचकाः लिखन्ति यत् अस्माकम् एषः महाकविः युद्धस्य वर्णने अपि स्वीयां मृदुतां त्यक्तुं न शक्तवान्। तस्य कारणं स्पष्टम् अस्ति – कालिदासः 'सानुक्रोशः' आसीत्।

'अनुक्रोश' शब्दस्य समीपे उपवेष्टुम् अर्हाः कोषेषु इतरे शब्दाः लभ्येरन्, किन्तु तस्य स्थाने उपवेष्टुं समर्थः कोऽपि अन्यः शब्दः न दृश्यते।

पदार्थविज्ञाने द्विविधं बलं प्रदर्श्यते। १. केन्द्रगामि बलम् २. केन्द्रत्यागि बलम्। केन्द्रगामि बलं पदार्थान् परस्परं योजयति। केन्द्रत्यागि बलं संयुक्तान् पदार्थान् वियोजयति। समाजे अपि वयं पश्यामः यत् स्नेहः, करुणा, क्षमा, अहिंसा, परोपकारः इत्यादिभिः सम्बद्धानि कर्माणि मनुष्यान् परस्परं योजयन्ति। ईर्ष्या, द्वेषः, वैरं, क्रोधः, हिंसा इत्यादिभिः सम्बद्धानि कर्माणि संयुक्तान् मनुष्यान् वियोजयन्ति। अत्र चिन्तनीयं यत् समाजे यदि केन्द्रगामिबलस्य प्रभावः अधिकः भवति तर्हि शान्तेः सम्भावना अपि वर्धते। प्रत्युत, केन्द्रत्यागिबलस्य सामर्थ्यं वर्धते चेत् समाजस्य अधःपतनं निश्चयेन भवति। अथ उत्तमः धर्मः कः इति विवादं कर्तुं नास्ति आवश्यकता। यः धर्मः केन्द्रगामिबलस्य पक्षे दृढं तिष्ठति सः उत्तमः धर्मः । यश्च केन्द्रत्यागिबलस्य पक्षे तिष्ठति सः अवकृष्टः धर्मः । चीनस्य पाकिस्थानस्य वा शास्त्रीयः धर्मः कोऽपि स्यात्, परन्तु तयोः धर्मः, आचारः वा केन्द्रगामी केन्द्रत्यागी वा इति चिन्तनीयम्।

आधुनिकस्य दूरभाषस्य जन्मनः अनन्तरं कश्चित् शब्दः विशेषतः प्रसिद्धिं प्राप्नोत्। सः शब्दः अस्ति – UPDATE इति । जीवने वा धर्मे वा UPDATE न भवति चेत् सङ्कटानि उत्पद्यन्ते । रजनीशस्य अपि एतदेव अभियानम् आसीत्। सः केन्द्रगामिधर्मस्य पक्षपाती आसीत्। परन्तु वयं तस्य कटु औषधं त्यक्तवन्तः, वैदेशिकाः च स्वीकृतवन्तः।

शास्त्रज्ञाः वदन्ति यत् भगवतः विष्णोः नूतनः अवतारः अचिरात् भविष्यति। अहं चिन्तयामि यत् तदानीं विष्णोः प्रियः शब्दः भविष्यति – UPDATE !

# दानेन सुखम्

व्योम शाहः



पुरा एकस्मिन् ग्रामे द्वे मित्रे निवसतः आस्ताम्। उभौ आढ्यौ आस्ताम्। नगरे विहरन्तौ तौ श्याममोहनौ एकं भिक्षां याचन्तं रङ्कं जनं दृष्टवन्तौ । तयोः श्यामस्य बुद्धिः प्रायोगिकी मोहनस्य च भौतिकी । तदानीं तं निर्धनं जनं दृष्ट्वा मोहनः दयापरः जातः । दयाम् आचरन् सः तस्मै दीनाय जनाय शतं सुवर्णमुद्राः अयच्छत् । अतीव मुदितः दीनः मोहनं 'धन्यवादाः' इत्युक्त्वा ततः गृहं प्रति अधावत्।

गृहं प्रति गच्छन् दीनः मार्गे कञ्चित् भिक्षुकं दृष्टवान्। धनं कस्मै अपि दातुम् अनिच्छन् सः तं दृष्टे सति गृहं प्रति अगच्छत्। केषाञ्चन चौराणां दृष्टिः दीनेन नीयमाने धनस्यूते अपतत्। मार्गे सः तैः चौरैः लुण्ठितः। दुःखार्तः सः ततः गृहं गत्वा अचिन्तयत् – "श्वः पुनः भिक्षां याचितुं गन्तव्यम्। अहो ! मे दोर्भाग्यम्।"

अग्रिमे दिने सः पुनः भिक्षां याचितुम् इतस्ततः अभ्रमत् । योगानुयोगेन सः पुनः श्याम-मोहनयोः दृष्टिगोचरं समायातः। मोहनः अचिन्तयत् यत् जीवनं जीवितुं पर्याप्तधने प्राप्ते सः किमर्थम् इतोऽपि याचते। संशयं निवारयितुं सः तं दीनं जनम् आहूतवान् पृष्टवान् च। दीनः सर्वं वृत्तान्तं तम् अश्रावयत्। तत् श्रुत्वा दयालुः सञ्जातः मोहनः तस्मै एकं बहु-मूल्यं रत्नं दत्तवान् । तत्प्राप्य अतीव मुदितः सः मोहनं "भूरिशः धन्यवादाः" इत्युक्त्वा ततः निर्गतः।

गृहं गच्छतः तस्य मार्गे सः पुनः कञ्चित् याचकं दृष्टवान् । कृपणः इव सन् सः तं दृष्ट्वाऽपि गृहं प्रति अगच्छत्। चौरेभ्यः भीतः सः शीघ्रं गृहम् प्राप्तवान्। द्वारे स्थितं रिक्तं घटं दृष्ट्वा सः अचिन्तयत् "एतत् रत्नं श्वः नाणकीकरिष्यामि। तावद् रत्नं अस्मिन् घटे स्थापयामि येन कश्चिदपि तत् न लभेत।" एवं चिन्तयित्वा सः तत् रत्नं तस्मिन् घटे स्थापितवान्। याचनक्रियया श्रान्तः सः विश्रामम् अकरोत्। तदानीं तस्य भार्या तं घटं गृहीत्वा जलं आनेतुम् अदूरस्थां नदीं गतवती । सा न ज्ञातवती यत् तस्मिन् रत्नम् आसीत्। अतः तं घटं नद्यां निमज्ज्य घटे जलमपूरयत्। निमज्जनकाले घटात् रत्नं नद्याम् अपतत्। सा ततः गृहम् आगतवती।

दीनः जागरुकीभूय जलेन पूर्णं घटं दृष्ट्वा भार्याम् अपृच्छत् – "कुत्रास्ति घटस्थं रत्नम्?" सा उक्तवती – "कुत्रासीत् भवतः रत्नम्? अहं तु न जानामि। घटे आसीत् चेत् तत् तु प्रायः जलप्रवाहे गतम्।" एतत् श्रुत्वा सः

बहुदुःखितः खेदितः च। सः स्वस्य दुर्भाग्ये अरोदित्। अग्रिमे दिने सः पुनः याचितुं भ्रमति स्म।

पूर्ववत् सः श्याममोहनाभ्यां दृष्टः । मोहनेन आहूतः सः दीनः युवकः सर्वं वृत्तान्तम् अकथयत् । मोहनोऽपि खेदितः । सः अचिन्तयत् यत् – "किम् एषः कदापि सुखं प्राप्स्यति ?" श्यामः तस्य विचारम् अवगतवान्। स्मयमानः सः तस्मै दिनाय एक-रुप्यकम् अददात्। दीनः युवकः तत् गृहीत्वा ततः गतः। मोहनः श्यामं पृष्टवान् –"एकेन रुप्यकेण अस्य किं भविष्यति?" सस्मितं सः उक्तवान् "तमेव अनुसृत्य पश्यतु।" मोहनः तथाऽकरोत्।

मार्गे दीनः अविचारयत् "प्राप्तेन एतेन एक-रुप्यकेन मम किं स्यात्। अनेन सकृद् भोजनमपि न क्रीयते। किं करवाणि ?" मार्गे सः एकं धीवरम् अपश्यत्। तस्य जाले एकः मत्स्यः बहिरागन्तुम् अकम्पत। तं मत्स्यं दृष्ट्वा दयापरः जातः सः तं मत्स्यम् अक्रीणात् जलपरिपूर्णे घटे च अस्थापयत् । ततः अपि निर्गन्तुं मीनः बहुयन्तम् आचरत्। नदीतीरं गत्वा सः तं मीनं सरिति प्राक्षिपत्। बहिः पततः तस्य मत्स्यस्य मुखात् रत्नं बहिः पतितम्। तद् दृष्ट्वा सः अत्यन्त-मुदितः "प्राप्तम्! प्राप्तम्! रत्नं प्राप्तम्!" इति सहर्षम् उदितवान्। गृहं साधयतः तस्य मार्गे तेन चौराः दृष्टाः । ते तं दीनं चोरितानि शत-सुवर्णमुद्राणि प्रत्यर्पयन् । एकेन उक्तम् "वयम् एनम् उपयोक्तुम् इच्छन्तः अपि न उपयोक्तुम् शक्तवन्तः। अतः तुभ्यमेव प्रत्यर्पयामः। कृपया अस्मान् क्षम्यताम्।"

प्राप्तेन तेन सः अतीव मुदितः । ततः सः महता हर्षेण गृहं गतः । सर्वमिदं वीक्षमाणः मोहनः अपि श्यामस्य गृहं गतः। उभौ मिथः सस्मितं दृष्टवन्तौ।

## शुनकस्य मित्रम्

रामेशकामेशौ प्रतिवेशिनौ। ग्रामे रामेशस्य विशेषगौरवम् आसीत्। यतः तस्य वचनेषु काचित् विलक्षणा शक्तिरस्ति इति जनाः भावयन्ति स्म। कामेशोऽपि रमेशः इव प्रसिद्धिं प्राप्तुम् इच्छन् तथैव वक्तुं प्रयतते स्म। किन्तु तदीयः सर्वः अपि प्रयासः विफलः अभवत्। सर्वेषाम् उपहासपात्रता प्राप्ता तेन।

एकदा कामेशस्य गृहस्य पुरतः ग्रामीणाः केचन उपविश्य वार्तालापं कुर्वन्तः आसन्। तेषु रामेशोऽपि अन्यतमः। तदा मार्गे गच्छन्तम् एकं शुनकं दृष्टवान् कामेशः। सः शुनकः गृहद्वारपर्यन्तम् आगत्य तत्रैव स्थितः। शुनकं पश्यन् कामेशः उक्तवान् – "रामेश, कोऽपि भवतः सुहृत् आगतः इति भासते" इति।

एतत् श्रुत्वा तत्रत्याः सर्वे अहसन्। रामेशः उत्थाय द्वारसमीपं गतः। शुनकः भषन् ततः निर्गतः।

"कः सः ? किमर्थम् आक्रोशन् सः प्रतिनिवृत्तः ?" इति पृष्टवान् कामेशः।

"सः कः इति तु अहं न जानामि। परं सः भवता एव मेलितुम् आगतः आसीत्। भवतः स्थाने अहं यदा गतः तदा सः आक्रोशन् गतः" इति रामेशः उक्तवान्।

एतत् श्रुत्वा तत्र स्थिताः सर्वेऽपि उच्चैः अहसन्। कामेशस्य मुखं तु लज्जया विवर्णं जातम् आसीत्।

# योगशास्त्रम्

✍ डॉ. सञ्जयकुमारः जोषीः

**(क्रमशः ... )**

**प्राणायामः –**

आयुः वर्धयति, रक्तशुद्धिं करोति, शरीरे प्राणवायुयुक्तं रक्तसंचारं करोति।

प्राणायामः तमस्–रजस्–गुणाभ्यां रचितमावरणं दूरीकृत्य सत्त्वगुणप्रधानात्मतत्त्वं प्रकटयति।

याः क्षतयः ताः प्राणायामेन दह्यन्ते।

पूरक–अनन्तरं कुम्भकप्राणायामे प्राणः फुप्फुसयोः स्थिरः भवति। अतः रक्तस्य अल्पातिअल्पकोषः अपि शुद्धः भवति। अनेन रक्तशुद्धिप्रक्रिया भवति इति। योगशास्त्रं सर्वैः स्वीकृतमस्ति। योगशास्त्रस्य वैज्ञानिकत्वं साधनीयं नास्ति किन्तु स्वतः सिद्धमेवाहं मन्ये। गरुडपुराणं स्वयम् अष्टाङ्गयोगं विज्ञानरूपेण स्वीकरोति यथा अष्टाङ्गयोगविज्ञानात्प्राप्नोत्यान्तिकं फलम्। (पू.ख.२१७/३७)

२०१० अनुसंधाने मेलबोर्नस्थाने विश्वस्य सर्वधर्माणाम् एका परिषद् मिलिता आसीत्। बोधीनाथः वेलनस्वामी तस्य एकः सदस्यः आसीत्। तस्य कथनानुसारं परिषदि एकः विषयः आसीत् 'योगसाधना'। सर्वधर्मपरिषद् द्वारा चर्चा दोहान–अन्ते नवनीतं निष्काषितम् यत्—

- आधुनिके काले –
- – योगविज्ञानं विश्वफलके अतिविकसितं जातम् अस्ति।
- – योगेन शारीरिक–मानसिकलाभः भवति।
- – योगस्य उद्भवः हिन्दुसंस्कृतौ जातः किन्तु आधुनिके काले योगं स्वीकर्तारः जनाः सर्वेषु धर्मेषु सन्ति। यथा अमेरिका देशे विंशतिलक्षजनाः योगं कुर्वन्ति।

संयुक्तराष्ट्र यु.एन. (युनाईटेड नेशन्स) संस्थायाः स्थापना १९४५ तमे वर्षे अभवत्। एषा संस्था समग्रे विश्वे जनानां शान्ति–पालन–शिक्षण–आरोग्य–आदीनां विवर्धनाय कार्यं करोति। अस्याः संस्थायाः त्रिनवत्यधिकशतं (१९३) देशाः सभ्याः सन्ति। सम्प्रति एव अनया संस्थया उद्घोषितं यत् जूनमासस्य २१ दिनाङ्कः 'विश्वयोगदिवस' रूपेण मान्यः। संयुक्तराष्ट्रस्य सप्तत्यधिकशतभिः (१७७) सभ्यदेशैः एषः प्रस्तावः स्वीकृतः। एषः योगस्य विश्वविजयः दिग्विजयः वर्तते।

परमपूज्यानां स्वामीराजर्षिमुनिश्रीणां दृढप्रयत्नेन, डॉ. दिनेश–अमीनमहोदयानां नम्रमार्गदर्शनेन च आकारितः गुजरातप्रदेशस्य एकमात्रं योगविश्वविद्यालयः 'लकुलीश योग युनिवर्सिटी' गुर्जरराज्ये सरखेज–गान्धिनगरमार्गे, छारोडी ग्रामे खिस्तस्य २०१३ तम वर्षस्य मे–मासस्य २३ दिनाङ्के (संवत २०६९ वैशाख–शुक्ल त्रयोदशी), उपवास–योगव्रतयोः विश्वस्तानां जनवल्लभानां गुर्जरप्रदेशस्य तत्कालीनमुख्यमन्त्रीपदेऽस्थितानां मान्यवराणां नरेन्द्रभाई मोदीमहोदयानां करकमलेन प्रारब्धः। 'विज्ञानरूपेण सर्वजनसुखाय–सर्वजनहिताय योगस्य विनियोगः भवेद्' इति ध्येयं स्वीकुर्वाणा संस्था एषा योगविद्यायाः संशोधन–अनुसन्धान–प्रयोगात्मकं त्रिविधं कार्यं सम्पादयति। अस्याः संस्थायाः कुलपतिमहोदयाः मान्याः श्रीमान् डॉ. बंसीधर–उपाध्यायाः योगविषयोपरि प्रायोगिक–सैद्धान्तिक संशोधनरताः छात्रप्रेरकाः च सन्ति। भाषा धर्म–जातिभेदान् विहाय विश्वस्य जनसमूहं योगेन सह संयोज्यमाना एषा संस्था खलु विश्वाय योगविद्यायाः आलयरूपा एव मन्येऽहम्।

पुराणानि सर्वविद्यास्थानानि सन्ति। तेषु वैशैषिकदर्शनशास्त्रस्यापि वर्णनम् अस्ति। यद्यापि गरुडपुराणं वैष्णवपुराणमस्ति तथापि पञ्चायतनदेवानां पूजां स्वीकरोति सम्यक् वर्णयति च। अस्य पुराणस्येदं वैशिष्ट्यम् एव।

नाशार्थं (विधर्मीणां विधर्मनाशार्थम्) वेदधर्मस्य स्थापनार्थं हरिः प्रभुः अवतरति। भक्तानां मनसि स्थितसङ्कीर्णतां — धार्मिककलहं दूरीकृत्य समवायस्य स्थापना एव पुराणानां परमोद्देशः अस्ति। पुराणधर्मः विशेषतया भक्तिमवलम्ब्य स्थितोऽस्ति। अन्धश्रद्धा-कुरीति-आदिभिः रोगैः ग्रस्ताय संसाराय (जनेभ्यः) कल्याणपदं यच्छन्ती परमौषधिः एव पुराणधर्मः। सर्वेषु प्राणिषु सत्यपथगामिनी सद्बुद्धेः विकासः एवं वासनायुक्तपशुबुद्धेः ह्रासः एव पुराणेषु प्रदर्शित विविधानाम् आख्यानानां स्तोत्राणां मन्त्राणाम् उद्देशः अस्ति। तद्वद् गरुडपुराणे प्रदर्शिनाम् आख्यानस्तोत्रमन्त्राणां हेतुः अनन्यः एवास्ति।

मानवानां मनसि विवेकोत्पत्तिं कृत्वा सत्पथगमनोत्साहवर्धनं करणीयमेव धर्मस्य पुराणानां च कर्म अस्ति। पुराणानि सत्पुरुषाणाम् अनुभूतजीवनदर्शनं संसारसमक्षं स्थापयन्ति। अनेन संसारिणां श्रद्धा स्वर्धमे दृढा भवति। सर्वेषां पुराणानां सनातनधर्मिणां जीवने महत्त्वं दृश्यते तथापि गरुडपुराणस्य विशेषं महत्त्वं वर्तते। जीवनसन्ध्याकाले यदा मानवः अदृश्यपरलोकयात्रायाः चिन्तनं करोति तदा तस्य मनः कम्पते। अस्मिन् सङ्कट-संशयकाले मनसि शान्ति-धैर्य-साहसानां प्रदानाय गरुडपुराणश्रवणस्य अभीष्टत्वमद्यापि संसारे दृश्यते।

मम मतानुसारम् उपरि निर्दिष्टे धार्मिक कार्येऽस्मिन् गरुडपुराणस्य मनोवैज्ञानिकः प्रभावः अस्ति एव।

गरुडपुराणस्य कथनम् अस्ति मानवजीवने सुखदुःखयोः गमनागमनं भवति एव। मूढं, बालं, युवानं, वृद्धम् अपि मानवं मृत्युः न मुञ्चति। संसारे अस्मिन् जन्तुः एक एव प्रजायते प्रलीयते च। सुकृतं दुष्कृतम् अपि एकमेव भुङ्क्ते। मृतः मानवः सर्वेषां समक्षम् एव सर्वं जहाति। मृतशरीरं चितायाम् उत्सृज्य बान्धवाः विमुखाः यान्ति, किन्तु धर्मः एव जन्तुना समं गच्छति। मानवजीवनस्य प्रत्यक्षसत्यस्यानेन निदर्शनेन गरुडपुराणस्य वैज्ञानिकत्वं सिध्यति।

गरुडपुराणेन मनुष्यत्वमेव भुक्तिमुक्त्योः शुभम् आलयं मतम्। जन्तुः सुकृत्या स्वकर्मणा च मनुष्यत्वं प्राप्य देवत्वस्य प्राप्त्यै साधनां करोति। सा एव मुक्तिः कथ्यते। मानवः ज्ञानेनानेन शास्त्रदृष्टिमवलम्ब्य भोग्यपदार्थानां (नश्वरपदार्थानाम्) नित्यपदार्थानां (शाश्वतपदार्थानां) मध्ये विवेकं कृत्वा स्वजीवनम् उत्तमम् उद्दातं च करोति। लोकजीवनयात्रायाः चत्वारः मार्गाः सन्ति धर्ममार्गः, अर्थमार्गः काममार्गः मोक्षमार्गः च। मोक्षमार्गस्य धर्मेण सह सम्बन्धः वर्तते। विना धर्मं मोक्षः न लभ्यते। नित्य-अनित्यविवेको हि ज्ञानम्। ज्ञानेनैव निवृत्तिः मोक्षः च लभ्येते। निवृत्तिरागस्य मानवस्य गृहम् एव तपोवनं भवति। धर्मः लोककल्याणस्य लोकमर्यादायाः च नियामिका शक्तिः वर्तते। अनेन धर्मस्याचरणेन एव मानवाः लौकिक-पारलौकिक-सुखप्राप्तिं कुर्वन्ति।

**स्तोत्र-मन्त्र-पूजादिषु वैज्ञानिकत्वम्** -

विज्ञानं स्वीकरोति यत् ब्रह्माण्डस्य मूलतत्त्वं सर्वव्याप्ता चेतना वर्तते। सा संकल्पमात्रेण सक्रिया भूत्वा विविधाकारान् गृह्णाति। समस्तं ब्रह्माण्डं चेतनास्पन्दनानि एव। स्पन्दनेषु भिन्नः भिन्नः प्रकाशः भिन्नः भिन्नः ध्वनिः च प्रादुर्भवतः। ऋषिभिः प्रकाशाधारेण विविधपञ्चतत्त्वानां भिन्न-भिन्नध्वनि-आधारेण बीजमन्त्राणां मन्त्रशास्त्राणां निर्माणं कृतम्। पूजानां भिन्ना-भिन्ना पद्धतिः दृश्यते पञ्चोपचारा, षोडशोपचारा, राजोपचारा च। गरुडपुराणे निर्दिष्टा षोडशोपचारापूजापद्धतौ क्रमेण आवाहन-आसन-पाद्य-अर्घ्य-आचमन-स्थान-वस्त्र-उपवीत-गन्ध-पुष्प-धूप-दीप-नैवैद्य नमस्कार-प्रदक्षिणा-विसर्जनम् इति। **(समाप्तः)**

## कृपया हसन्तु

वित्तकोषे एकं फलकं लम्बितम् आसीत् । तस्मिन् फलके 'पृच्छास्थानम्' "भवन्तः किमपि प्रष्टुं शक्नुवन्ति" इति लिखितम् आसीत् ।

नमनः तत्र गत्वा अपृच्छत् - "महोदये, आलुकस्य मूल्यं किम् ?"

★ ★ ★ ★ ★

पतिः - (पत्नीम् उद्दीश्य) आवयोः पुत्रः निश्चयेन नेता भविष्यति ।

पत्नी - भवान् कथं ज्ञातवान् ?

पतिः - तस्य वचनानि श्रुत्वा आनन्दः अनुभूयते किन्तु तत्र यथार्थता किमपि न भवति ।

★ ★ ★ ★ ★

नमनः - (रमणम् उद्दिश्य) मम जन्म महाराष्ट्रे न अभवत् इति सम्यक् एव जातम् ।

रमणः - किमर्थम् ?

नमनः - कारणम् अहं मराठीभाषायाः एकमपि शब्दं न जानामि ।

★ ★ ★ ★ ★

शिक्षकः - (नमनम् उद्दिश्य) सत्यस्य असत्यस्य च मध्ये कियत् अन्तरम् अस्ति ?

नमनः - ३० किलोमीटरपरिमितम् ।

शिक्षकः - (साश्चर्यम्) तत् कथम् ?

नमनः - गान्धियाश्रमात् गान्धिनगरम् ३० किलोमीटरदूरे एव अस्ति ।

## प्रहेलिका

– संस्कृतविकिपिडीयाजालस्थानात्

**न पक्षी विहगश्चैव द्रुतगामी न मारुतः ।**
**न घनो घनहारी च न मुखी मखरस्स कः ॥**

आकाशे विहरति, किन्तु पक्षी न। (पक्षवान् किन्तु पक्षी (विहगः न)। वेगेन चलति, किन्तु मारुतः न। मेघः न, किन्तु भारयुतं नयति। मुखं नास्ति किन्तु महान्तं शब्दं करोति। कः सः ?

**उत्तरम्** – विमानम्

**पर्वताग्रे रथो याति भूमौ तिष्ठति सारथिः ।**
**चलने वायुवेगेन पदमेकं न गच्छति ॥**

पर्वतस्य उपरि रथः सञ्चरति। रथस्य सारथिः भूमौ तिष्ठति। रथः वायुवेगेन चलति। किन्तु एकमपि पदम् अग्रे न गच्छति। तर्हि किमेतत् ?

**उत्तरम्** – कुलालचक्रदण्डः

**पादैः पीयते सततं हरितैः पत्रैश्च शोभते ।**
**तप्तेभ्यः दीयते छाया कः सः सर्वजनः प्रियः ॥**

यः पादैः सततं जलं पिबति। पत्रैः सर्वदा शोभते। यः आतपे तप्तेभ्यः छायां ददाति सर्वेषां प्रियः च वर्तते सः कः ?

**उत्तरम्** – पादपः (वृक्षः)

## ज्ञानसरिता

**वाणिज्ये अग्नेः उपयोगः** –वाणिज्ये अग्नेः उपयोगस्य विषये प्राचीनस्य कार्थेज्नामकस्य ग्रीकनगरस्य जनाः विशेषतः निपुणाः आसन्। प्रसिद्धः इतिहासज्ञः हेरोडोटसः वदति यत् ते समुद्रे नौकां स्थगयित्वा विक्रेतव्यानि वस्तूनि तीरे प्रसारयन्ति स्म। ततः नौकां गत्वा महान्तं धूमम् उत्पादयन्ति स्म। सा च धूमराजिः मैल्दूरात् अपि द्रष्टुं योग्या भवति स्म। सा क्रेतॄन् ज्ञापयति स्म यत् वाणिज्यनौका नौकास्थानं प्रति आगता अस्ति इति। जनाः नौकास्थानं प्रति आगत्य अपेक्षितस्य वस्तुनः मूल्यत्वेन सुवर्णं निक्षिप्य ततः अनतिदूरे अदृश्यतया तिष्ठन्ति स्म। नौकास्थाः वणिजः ग्रामीणैः स्थापितं सुवर्णं वस्तुनः मूल्यस्य अनुगुणम् अस्ति वा न वेति परीक्षन्ते स्म। यदि तत्र स्थापितं सुवर्णं तृप्तिजनकं तर्हि ते तत् स्वीकृत्य नौकां प्रति गच्छन्ति स्म। ततः ग्रामीणाः तत् वस्तु नयन्ति स्म।

**प्रैरीशुनकाः** –'प्रैरीशुनकाः' नामकाः जीविनः वस्तुतः न शुनककुलीयाः। किम् एतत् भवत्सु आश्चर्यं जनयति? आश्चर्यकरम् अपि एतत् न असत्यम्।

एते वस्तुतः दंशजातीयाः। ३० से.मी. दैर्घ्यं भवति प्रायः एतेषाम्। चिक्रोडसजातीयाः एते इति वक्तुं शक्यं प्रायः। तथापि एते यं ध्वनिम् उत्पादयन्ति सः शुनकानाम् इव भवति इत्यतः नाम्ना शुनकत्वं प्राप्तम् अस्ति एतैः।

एते जीविनः दिवाकाले खादन्तः अन्यैः सजातीयैः सह विहरन्तः च दृश्यन्ते स्वस्य वसतिप्रदेशेषु। रात्रौ च सुरक्षायुक्ते बिले सुखेन निद्रान्ति।

प्रैरीशुनकाः ग्रामनगरादिषु विशालवसतिप्रदेशेषु एव निवसन्ति। तत्र एतेषां वासः भवति सामूहिकतया। एकस्मिन् समूहे सप्तत्यधिकाः प्रैरीशुनकाः भवन्ति। एकः प्रैरीशुनकः यदा अपरेण मिलति तदा दन्तप्रदर्शनद्वारा परस्पराभिनन्दनं भवति। ततः तौ मैत्रीसूचकतया पुच्छं चालयतः।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **सैरिभिः** | भैंसा | a buffalo |
| **सोदरः** | सगा भाई | a uterine brother |
| **सोपानम्** | सीढ़ी | a ladder |
| **सोल्लुण्ठः** | व्यंग्य | irony |
| **सौकुमार्यम्** | जवानी | youthfulness |
| **सौख्यम्** | सुख | pleasure |
| **सौदामनी** | बिजली | lightning |
| **सौधम्** | महल | a palace |
| **सौभगम्** | अच्छा भाग्य | good luck |
| **सौमनस्यम्** | मन का संतोष | Satisfaction of mind |
| **सौरभम्** | सुगन्ध | fragrance |
| **सौराज्यम्** | अच्छा प्रशासन | good administration |
| **सौष्ठवम्** | श्रेष्ठता | excellence |
| **सौहार्दम्** | हृदय की सरलता | good heartedness |
| **स्तवकः** | गुच्छा | a bunch |

## किं भवन्तः जानन्ति ?

**१) 'सौन्दर्यलहरी' ग्रन्थस्य कर्ता कः वर्तते?**

(क) भास्कराचार्यः (ख) शङ्कराचार्यः (ग) जगनिकः (घ) तुलसीदासः

**२) 'कृत्यकल्पतरुः' ग्रन्थस्य रचयिता कः वर्तते?**

(क) श्रीहर्षः (ख) भारविः (ग) लक्ष्मीधरभट्टः (घ) भवभूतिः

**३) 'न्यायकुसुमाञ्जलिः' ग्रन्थस्य प्रणेतुः नाम किम् अस्ति?**

(क) उदयनाचार्यः (ख) श्रीहर्षः (ग) अश्वघोषः (घ) भारविः

**४) याज्ञवल्क्यस्मृतेः रचयिता कः वर्तते?**

(क) व्यासः (ख) नारदः (ग) मनुः (घ) याज्ञवल्क्यः

**५) बृहत्कथामञ्जर्याः कर्ता कः अस्ति?**

(क) भासः (ख) कालिदासः (ग) क्षेमेन्द्रः (घ) दण्डी

**६) एतेषु कस्मिन् ग्रन्थे भगवद्गीता वर्णितास्ति?**

(क) भागवतपुराणे (ख) ऋग्वेदे (ग) महाभारते (घ) रामायणे

**७) योगवासिष्ठस्य रचयिता कः वर्तते?**

(क) याज्ञवल्क्यः (ख) शङ्कराचार्यः (ग) केशवदासः (घ) वाल्मीकिः

उत्तराणि – (१) ख (२) ग (३) क (४) घ (५) ग (६) ग (७) घ

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Learn Online**

## संस्कृत-सम्भाषण-वर्गः

**( प्रथमः स्तरः )**

**Date :** 24/08/20 to 30/11/20
**Day :** Mon-Wed-Fri
**Time :** 6:30 pm to 8:00 pm
**Fees :** 5000/-

- **Venue :** Eklavya Sanskrit Academy
  Core House, Nr Parimal Garden,
  Ellisbridge Ahmedabad
- **Contact:** Dr. Mihir Upadhyay,
  Mobile: 98246 16237

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

- શું તમે સંસ્કૃત બોલવા માંગો છો?
- શું તમે સંસ્કૃત ભાષાનાં ઉત્તમ શિક્ષક બનવા માંગો છો ?
- શું તમે સંસ્કૃતને સંસ્કૃત માધ્યમમાં ભણાવવા માંગો છો ?
- શું તમે સંસ્કૃતક્ષેત્રે ઉત્તમ કારકીર્દિ બનાવવા માંગો છો ?

તો અહીં છે, એક તક **એકલવ્ય સંસ્કૃત એકેડેમી** દ્વારા આયોજીત

## "Diploma In Sanskrit Teaching"

**શ્રીસોમનાથ સંસ્કૃત યુનિવર્સિટી** માન્ય કોર્ષમાં

ભાગ લો અને ઉત્તમ શિક્ષક બનો.

કોઈપણ પ્રવાહમાં ધોરણ ૧૨ પાસ, પ્રવેશને યોગ્ય.
મર્યાદિત ૨૫ બેઠકો.
પ્રવેશપત્ર કોરહાઉસ, ઓફ. સી જી રોડ ખાતે ઉપલબ્ધ.

અભ્યાસક્રમની વિશેષતા:

→ તાલીમ માટેનું ગુણવત્તાયુકત વાતાવરણ.
→ પ્રત્યક્ષપદ્ધતિ દ્વારા શિક્ષણ.
→ અનુભવિ શિક્ષકો દ્વારા શિક્ષણ.
→ શ્રેષ્ઠ તાલીમાર્થીઓ માટે નોકરીની ઉત્તમ તક.

વધુ માહિતી માટે સંપર્ક કરોઃ ડૉ. મિહિર ઉપાધ્યાય **9824616237**

- **Contact:** Dr. Mihir Upadhyay,
  Mobile: 98246 16237

संस्कृत-
## साम्प्रतम्

नमस्कारः
यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | - 100 |
| द्वैवार्षिकं रू | - 175 |
| त्रैवार्षिकं रू | - 250 |
| अङ्कमूल्यं रू | - 10 |

**प्रियवाचकाः**

- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006